# নারাযণকবচম্

{॥ নারাযণকবচম্ ॥}

রাজোবাচ ।

যযা গুপ্তঃ সহস্রাক্ষঃ সবাহান্রিপুসৈনিকান্ ।

ক্রীডন্নিব বিনির্জিত্য ত্রিলোক্যা বুভুজে শ্রিযম্ ॥ ১॥

ভগবংস্তন্মমাখ্যাহি বর্ম নারাযণাত্মকম্ ।

যথাঽঽততাযিনঃ শত্রূন্ যেন গুপ্তোঽজযন্মৃধে ॥ ২॥

শ্রীশুক উবাচ ।

বৃতঃ পুরোহিতস্ত্বাষ্ট্রো মহেন্দ্রাযানুপৃচ্ছতে ।

নারাযণাখ্যং বর্মাহ তদিহৈকমনাঃ শৃণু ॥ ৩॥

বিশ্বরূপ উবাচ ।

ধৌতাঙ্ঘ্রিপাণিরাচম্য সপবিত্র উদঙ্মুখঃ ।

কৃতস্বাঙ্গকরন্যাসো মন্ত্রাভ্যাং বাগ্যতঃ শুচিঃ ॥ ৪॥

নারাযণমযং বর্ম সন্নহ্যেদ্ভয আগতে ।

পাদযোর্জানুনোরূর্বোরুদরে হৃদ্যথোরসি ॥ ৫॥

মুখে শিরস্যানুপূর্ব্যাদোংকারাদীনি বিন্যসেত্ ।

Stotram Digitalized By Sanskritdocuments.org

ॐ নমো নারাযণাযেতি বিপর্যযমথাপি বা ॥ ৬॥

করন্যাসং ততঃ কুর্যাদ্দ্বাদশাক্ষরবিদ্যযা ।
প্রণবাদিযকারান্তমঙ্গুল্যঙ্গুষ্ঠপর্বসু ॥ ৭॥

ন্যসেদ্ধৃদয ওঙ্কারং বিকারমনু মূর্ধনি ।
ষকারং তু ভ্রুবোর্মধ্যে ণকারং শিখযা দিশেত্ ॥ ৮॥

বেকারং নেত্রযোর্যুঞ্জ্যান্নকারং সর্বসন্ধিষু ।
মকারমস্ত্রমুদ্দিশ্য মন্ত্রমূর্তির্ভবেদ্বুধঃ ॥ ৯॥

সবিসর্গং ফডন্তং তত্ সর্বদিক্ষু বিনির্দিশেত্ ।
ॐ বিষ্ণবে নম ইতি ॥ ১০॥

আত্মানং পরমং ধ্যাযেদ্ধ্যেযং ষটশক্তিভির্যুতম্ ।
বিদ্যাতেজস্তপোমূর্তিমিমং মন্ত্রমুদাহরেত্ ॥ ১১॥

ॐ হরির্বিদধ্যান্মম সর্বরক্ষাং
ন্যস্তাঙ্ঘ্রিপদ্মঃ পতগেন্দ্রপৃষ্ঠে ।
দরারিচর্মাসিগদেষুচাপ-
পাশান্দধানোঽষ্টগুণোঽষ্টবাহুঃ ॥ ১২॥

জলেষু মাং রক্ষতু মৎস্যমূর্তি-

র্যাদোগণেভ্যো বরুণস্য পাশাত্ ।

স্থলেষু মায়াবটুবামনোঽব্যাত্

ত্রিবিক্রমঃ খেঽবতু বিশ্বরূপঃ ॥ ১৩॥

দুর্গেষ্বটব্যাজিমুখাদিষু প্রভুঃ

পায়ান্নৃসিংহোঽসুরযূথপারিঃ ।

বিমুঞ্চতো যস্য মহাট্টহাসং

দিশো বিনেদুর্ন্যপতংশ্চ গর্ভাঃ ॥ ১৪॥

রক্ষত্বসৌ মাধ্বনি যজ্ঞকল্পঃ

স্বদংষ্ট্রয়োন্নীতধরো বরাহঃ ।

রামোঽদ্রিকূটেষ্বথ বিপ্রবাসে

সলক্ষ্মণোঽব্যাদ্ভরতাগ্রজোঽস্মান্ ॥ ১৫॥

মামুগ্রধর্মাদখিলাৎপ্রমাদা-

ন্নারায়ণঃ পাতু নরশ্চ হাসাত্ ।

দত্তস্ত্বযোগাদথ যোগনাথঃ

পায়াদ্গুণেশঃ কপিলঃ কর্মবন্ধাত্ ॥ ১৬॥

সনৎকুমারোঽবতু কামদেবা-

দ্ধয়শীর্ষা মাং পথি দেবহেলনাত্ ।

দেবর্ষিবর্যঃ পুরুষার্চনান্তরাত্
কূর্মো হরির্মাং নিরযাদশেষাত্ ॥ ১৭॥

ধন্বন্তরির্ভগবান্পাত্বপথ্যা-
দ্দ্বন্দ্বাদ্ভযাদৃষভো নির্জিতাত্মা ।
যজ্ঞশ্চ লোকাদবতাজ্জনান্তা-
দ্বলো গণাৎক্রোধবশাদহীন্দ্রঃ ॥ ১৮॥

দ্বৈপাযনো ভগবানপ্রবোধা-
দ্বুদ্ধস্তু পাখণ্ডগণপ্রমাদাত্ ।
কল্কিঃ কলেঃ কালমলাৎপ্রপাতু
ধর্মাবনাযোরুকৃতাবতারঃ ॥ ১৯॥

মাং কেশবো গদযা প্রাতরব্যা-
দ্গোবিন্দ আসঙ্গবমাত্তবেণুঃ ।
নারাযণঃ প্রাহ্ণ উদাত্তশক্তি-
র্মধ্যন্দিনে বিষ্ণুররীন্দ্রপাণিঃ ॥ ২০॥

দেবোঽপরাহ্ণে মধুহোগ্রধন্বা
সাযং ত্রিধামাবতু মাধবো মাম্ ।
দোষে হৃষীকেশ উতার্ধরাত্রে
নিশীথ একোঽবতু পদ্মনাভঃ ॥ ২১॥

শ্রীবৎসধামাপররাত্র ঈশঃ

প্রত্যুষ ঈশোঽসিধরো জনার্দনঃ ।

দামোদরোঽব্যাদনুসন্ধ্যং প্রভাতে

বিশ্বেশ্বরো ভগবান্ কালমূর্তিঃ ॥ ২২॥

চক্রং যুগান্তানলতিগ্মনেমি

ভ্রমৎসমন্তাদ্ভগবৎপ্রযুক্তম্ ।

দন্দগ্ধি দন্দগ্ধ্যরিসৈন্যমাশু

কক্ষং যথা বাতসখো হুতাশঃ ॥ ২৩॥

গদেঽশনিস্পর্শনবিস্ফুলিঙ্গে

নিষ্পিণ্ঢি নিষ্পিণ্ঢ্যজিতপ্রিয়াসি ।

কূষ্মাণ্ডবৈনাযকযক্ষরক্ষো-

ভূতগ্রহাংশ্চূর্ণয চূর্ণযারীন্ ॥ ২৪॥

ত্বং যাতুধানপ্রমথপ্রেতমাতৃ-

পিশাচবিপ্রগ্রহঘোরদৃষ্টীন্ ।

দরেন্দ্র বিদ্রাবয কৃষ্ণপূরিতো

ভীমস্বনোঽরেহৃর্দযানি কম্পযন্ ॥ ২৫॥

ত্বং তিগ্মধারাসিবরারিসৈন্য-

মীশপ্রযুক্তো মম ছিন্ধি ছিন্ধি ।

চক্ষূংষি চর্মঞ্জুতচন্দ্র ছাদয

দ্বিষামঘোনাং হর পাপচক্ষুষাম্ ॥ ২৬॥

যন্নো ভযং গ্রহেভ্যোঽভূৎকেতুভ্যো নৃভ্য এব চ।

সরীসৃপেভ্যো দংষ্ট্রিভ্যো ভূতেভ্যোংঽহোভ্য বা ॥ ২৭ ॥

সর্বাণ্যেতানি ভগবন্নামরূপাস্ত্রকীর্তনাত্।

প্রযান্তু সংক্ষযং সদ্যো যে নঃ শ্রেযঃপ্রতীপকাঃ ॥ ২৮॥

গরুডো ভগবান্ স্তোত্রস্তোভশ্ছন্দোমযঃ প্রভুঃ।

রক্ষত্বশেষকৃচ্ছ্রেভ্যো বিষ্বক্সেনঃ স্বনামভিঃ ॥ ২৯ ॥

সর্বাপদ্ভ্যো হরের্নামরূপযানাযুধানি নঃ।

বুদ্ধীন্দ্রিযমনঃপ্রাণান্পান্তু পার্ষদভূষণাঃ ॥ ৩০॥

যথা হি ভগবানেব বস্তুতঃ সদসচ্চ যত্।

সত্যেনানেন নঃ সর্বে যান্তু নাশমুপদ্রবাঃ ॥ ৩১॥

যথৈকাত্ম্যানুভাবানাং বিকল্পরহিতঃ স্বযম্।

ভূষণাযুধলিঙ্গাখ্যা ধত্তে শক্তীঃ স্বমাযযা ॥ ৩২॥

তেনৈব সত্যমানেন সর্বজ্ঞো ভগবান্ হরিঃ।

পাতু সর্বৈঃ স্বরূপৈর্নঃ সদা সর্বত্র সর্বগঃ ॥ ৩৩॥

বিদিক্ষু দিক্ষূর্ধ্বমধঃ সমন্তা-

দন্তর্বহির্ভগবান্নারসিংহঃ ।

প্রহাপযংল্লোকভযং স্বনেন

স্বতেজসা গ্রস্তসমস্ততেজাঃ ॥ ৩৪ ॥

মঘবন্নিদমাখ্যাতং বর্ম নারাযণাত্মকম্ ।

বিজেষ্যস্যঞ্জসা যেন দংশিতোঽসুরযূথপান্ ॥ ৩৫ ॥

এতদ্ধারযমাণস্তু যং যং পশ্যতি চক্ষুষা ।

পদা বা সংস্পৃশেৎসদ্যঃ সাধ্বসাৎস বিমুচ্যতে ॥ ৩৬॥

ন কুতশ্চিদ্ভযং তস্য বিদ্যাং ধারযতো ভবেত্ ।

রাজদস্যুগ্রহাদিভ্যো ব্যাঘ্রাদিভ্যশ্চ কর্হিচিত্ ॥ ৩৭ ॥

ইমাং বিদ্যাং পুরা কশ্চিৎকৌশিকো ধারযন্ দ্বিজঃ ।

যোগধারণযা স্বাঙ্গং জহৌ স মরুধন্বনি ॥ ৩৮॥

তস্যোপরি বিমানেন গন্ধর্বপতিরেকদা ।

যযৌ চিত্ররথঃ স্ত্রীভির্বৃতো যত্র দ্বিজক্ষযঃ ॥ ৩৯ ॥

গগনান্ন্যপতৎসদ্যঃ সবিমানো হ্যবাক্শিরাঃ ।

স বালখিল্যবচনাদস্থীন্যাদায বিস্মিতঃ ।

প্রাস্য প্রাচীসরস্বত্যাং স্নাত্বা ধাম স্বমন্বগাত্ ॥ ৪০॥

শ্রীশুক উবাচ ।

য ইদং শৃণুযাৎকালে যো ধারযতি চাদৃতঃ ।

তং নমস্যন্তি ভূতানি মুচ্যতে সর্বতো ভযাত্ ॥ ৪১॥

এতাং বিদ্যামধিগতো বিশ্বরূপাচ্ছতক্রতুঃ ।

ত্রৈলোক্যলক্ষ্মীং বুভুজে বিনির্জিত্য মৃধেঽসুরান্ ॥ ৪২॥

॥ ইতি শ্রীমদ্ভাগবতমহাপুরাণে পারমহংস্যাং সংহিতাযাং

ষষ্ঠস্কন্ধে নারাযণবর্মকথনং নামাষ্টমোঽধ্যাযঃ ॥

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

% File name : narayana-kavacha.itx
% Category : kavacha
% Location : doc_vishhnu
% Author : Maharshi Vyas
% Language : Sanskrit
% Subject : philosophy/hinduism/religion shhashhThaskandhe naaraayaNavarmakathana.n naamaashhTamo.adhyaayaH
% Description-comments : bhAgavatamahApurANa paaramaha.nsyaa.n sa.nhitaayaa.n
% Latest update : January 19, 1999
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website